Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
OPEN ACCESS
© 2023 GISRRJ | Volume 6 | Issue 6 | ISSN : 2582-0095

# व्याकरणसिद्धान्तसूधानिधौ तद्धितसूत्रेषु ऊद्धृतानां अमरकोशस्थपङ्क्तीनां समीक्षणम्

मनीषा साहू
शोधच्छात्रा, व्याकरणविभाग:, राष्ट्रियसंस्कृतविश्वविद्यालय:, तिरुपति:

**Article Info**
Volume 7, Issue 1
**Page Number :** 01-09
**Publication Issue :**
January-February-2024
**Article History**
Accepted : 01 Jan 2024
Published : 15 Jan 2024

**सारांश:-** सुधानिधिकारेण स्वग्रन्थे विविधसूत्रेषु सूत्रोदाहरणमनुरीत्या अमरकोशस्थ पङ्क्तय: उद्धृता:। अत्र मया केवलं तद्धितसूत्रेषु ऊद्धृता: अमरकोशस्थपङ्क्तय: यथामति विस्तृततया प्रतिपादिता:।

**विशेषशब्दा:-** अहंकारवत्,नामनी, अर्णस्, पथम्, पुष्करम्, सर्वतोमुखम्, अम्भस्, ईषत्पाण्डु, अण्डकोश, द्रोणक्षीरा, द्रोणदुग्धा, दक्षिणीय:, दक्षिणार्ह:, दक्षिण्यश्च, मैथुनिका, मैथुनिक, मथितम् इत्यादय:।

अष्टाध्यायीस्थ चतुर्थाध्याये पठितमिदं सूत्रं "उदश्वितोऽन्यतरस्याम्" [1] सुत्रेणानेन सप्तमीसमर्थाद् उद्श्वित् प्रातिपदिकात्संस्कृतं भक्षा इत्येतस्मिन्नर्थे विकल्पेन ठक् -प्रत्ययो भवतीति। एतेन "उद्श्विति संस्कृतमौदश्वितम्,पक्षे अण्-भूत्वा औदश्वितमिति रूपंसिध्यति। सूत्रस्यास्य व्याख्यानावसरे आचार्य विश्वेश्वर सूरि महाभागेन व्याकरणसिद्धान्तसुधानिधौ[2] अमरसिंहविरचित - अमरकोशानुसारं को नाम उदश्वित् तद् उल्लिखितं, तत् विस्तृततया प्रदर्श्यते -

अमरकोशस्य द्वितीयकाण्डे वैश्यवर्गस्य पञ्चत्रिंशत्तमे श्लोके "तक्रं ह्युदश्विन्मथितं पादाम्बवर्धाम्बु निर्जलम्"[3] इति दण्डाहतस्य (देवनागर्यां तु "मठ्ठा" इत्युच्यते) भेदा: उक्ता:।

यस्मिन् दण्डाहते एकचतुर्थांश - जलंपातयित्वा मथनं क्रियते तत् "तक्रम्" इत्युच्यते।

यस्मिन् दण्डाहते अर्धं दण्डाहतं अर्द्ध जलं वर्तते, तत्"उदश्वित् " नाम्ना ज्ञायते। यस्मिन् च दण्डाहते जलं न भवति, तत्तु "मथितं" इत्युच्यते।

सुत्रान्तरे प्रविशामि "द्युप्राणपागुदक्प्रतीचो यत्" [4] सूत्रेणानेन दिव्, प्राच्, अपाच्, उदच्, प्रत्यच् इत्येतेभ्य: प्रातिपदिकेभ्यो यत् प्रत्ययो भवति शैषिक: इति। दिव्यम्, प्राच्यम्, अपाच्यम्, उदीच्यम्, प्रतीच्यम् इत्यस्योदाहरणम्। सूत्रेऽस्मिन् आचार्येण स्वग्रन्थे[5] अमरकोशस्य श्लोकोऽयं प्रदर्शित:-

---

[1] अष्टा0-4/2/19

[2] व्या. सि.सु- सूत्र.सं - 4/2/19, पृ.सं -81

[3] अमरकोष:, द्वितीयकाण्डम् वैश्यवर्ग: , श्लो.सं-53

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**"दिशस्तु ककुभः काष्ठा आशश्च हरितश्च ताः।**

**प्राच्यवाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः॥[6]**

श्लोकोऽयं अमरकोशस्य प्रथमकाण्डस्य दिग्वर्णस्य प्रथमः वर्तते। दिशां पञ्चनामानि भवन्ति - दिश्, ककुभ्, काष्ठा, आशा हरितश्च इति। पूर्वदिग् "प्राची" नाम्ना ज्ञायते, दक्षिणस्तु "अवाची" इत्युच्यते, तथैव पश्चिम "प्रतीची", उत्तरस्तु "उदीची" इत्यभिधीयते। इति।

तथैव " धन्वयोपधाद् वुञ् "[7] इति सूत्रव्याख्यानावसरे आचार्येण "समानौ मरुधन्वानौ"[8] इति पंक्तिः पठिता, तदग्रे प्रदर्शयामि-

प्रकृतसूत्रेणानेन देशाभिधायिनो धन्ववाचिनो योपधाच्च वृद्धसंज्ञकात्प्रातिपदिकात् शैषिको वुञ् प्रत्ययो भवतीति। धन्वशब्दो मरुदेशवाची।

सूत्रेऽस्मिन् आचार्येण अमरकोशस्थ द्वितीयकाण्डस्य प्रथमवर्ग- भूमिवर्गस्य पञ्चमश्लोकात् पंक्ति एकाउद्धृता,तद्यथा -

**"ऊषवानूषरो द्वावप्यन्यलिङ्गौ स्थलं स्थली।**

**समानौमरुधन्वानौ द्वे खिलाप्रहते समे "॥[9]**

अस्यायमाशयः- ऊषरभूमेः नामद्वयं भवति-ऊषवत्, ऊषरेति। विशेषणत्वात् त्रिष्वपि लिङ्गेषु भवन्ति तद्यथा - ऊषवती, ऊषरा वा स्थली, ऊषरं स्थलम्। स्थलं स्थली इति स्थलस्य नामद्वयं वर्तते। निर्जल (मरु) देशस्य च मरु धन्वान इति नामद्वयं, एवञ्च खिल-अप्रहत इति द्वेहलाधकृष्टक्षेत्रस्य नाम इति।

एवञ्चाग्रे " तेन दीव्यति - खनति - जयति - जितम् "[10] इति सूत्रे आचार्येण"अभ्रिः स्त्री काठकुद्दालः"[11]इति पड्क्तिः उद्धृता।

प्रकृतसूत्रेणानेन तृतीयासमर्थात् "दीव्यति", "खनति" "जितम्" एतेषु अर्थषु ठक् - प्रत्ययः भवति। इति। अत्र अभ्रया खनति अभ्रिकः इत्युदाहरणं प्रदर्शितम्। सूत्रस्य व्याख्यानावसरे को नाम अभ्रि तदर्थं आचार्येण अमरकोशस्थ प्रथमकाण्डस्य वारिवर्गस्य त्रयोदशतम- श्लोकस्य एका पड्क्तिः उद्धृता तदत्र प्रदर्श्यते -

**"अभिः स्त्री काष्ठकुदालः सेकमात्रं तु सेचनम्**

---

[4] अष्टा0 -4/2/100

[5] व्या.सि .सु ,सू.सं - 4/2/101, पृ.सं- 100

[6] अमरकोशः, प्रथमकाण्डम्, दिग्वर्गः प्रथमश्लोकः

[7] अष्टा - 4/2/120

[8] व्या.सि.सु- सू.सं -4/2/121 , पृ.सं-105

[9] अमरकोशः द्वितीयकाण्डस्य भूमिवर्गे, पञ्चमश्लोकः ।

[10] अष्टा - 4/4/2

[11] व्या .सि.सु - सू.सं -4/4/2, पृ.सं-147

**क्लीबेऽर्धनावं नावोऽर्धेऽतीतनौकेऽतिनु त्रिषु॥"** [12]

अस्यायमाशयः- नावः शूचीकरणार्थं उपकरणद्वयं व्यवह्रियते, तौ "अभ्रि", "काष्ठकुद्दाल" इति नाम्ना अभिधीयेते इति।

"श्राणा" इति शब्दस्येल्लेखः "श्राणामांसौदनाट्ठिन्"[13]इत्यत्र दृश्यते। का नाम श्राणा इत्यत्र सुधानिधिकारेण स्वग्रन्थे अमरकोशानुरीत्या प्रतिपादितम्, तदत्र प्रदर्श्यते- "श्राणामांसौदनाट्ठिन्" इति सूत्रेण प्रथमासमर्थाभ्यां श्राणा, मांसौदन इत्येताभ्यां प्रातिपदिकाभ्यां नियुक्तमस्मै दीयते इत्येतस्मिन् विषये टिठन् प्रत्ययो भवति इति। श्राणानियतं दीयतेऽस्मै श्राणिकः इत्यस्योदाहरणम्।

का नाम श्राणा एतदर्थंआचार्येण "यवागूः"शिवका श्राणेत्यमरः"[14]इति अमरकोशस्थ द्वितीयकाण्डस्य वैश्यवर्गस्य पञ्चाशत्तम - श्लोकात् पङ्क्तिरियं प्रदर्शिता-

**"यवागूरुष्णिका श्राणा विलेपी तरला च सा।**

**प्रक्षणाऽभ्यञ्जने तैलं कृसरस्तु तिलौदनः।**

**गव्यं त्रिषु गवां सर्वं गोविड्गोमयस्त्रियाम्॥**[15]

यवागूः, रुष्णिका, श्राणा, विलेपी, तरला इति तरलोदनस्य पञ्चनानानि सन्ति। तदनन्तरं "गुणवचनब्राह्मणादिभ्यः कर्मणि च "[16] इत्यनेन षष्ठीसमर्थेभ्यः गुणवचनेभ्यो ब्राह्मणादिभ्यश्च प्रातिपदिकेभ्यःकर्मण्यभिधेये भावे च ष्यञ्-प्रत्ययो भवतीति। सुत्रेऽस्मिन् " औचित्यमौचिती मैत्र्यं मैत्री"[17]इति अमरकोशस्य पङ्क्तिः उद्धृता। तदत्र प्रदर्श्यते-

**"स्त्रीनपुंसकयोर्भावक्रिययोःष्यञ्क्वचिच्च वुञ्।**

**औचित्यमौचिती मैत्री मैत्र्यं वुञ् प्रागुदाहृतः॥"**[18]

भावे कर्मणि चार्थे स्त्रीलिङ्गे नपुंसकलिङ्गे चष्यञ्- प्रत्ययः भवति, क्वचित् वुञ् च भवति। ष्यञ् प्रत्यस्योदाहरणं यथा - "उचितस्य भावः औचित्यम्,मित्रस्य कर्म मैत्रं, मैत्री वा। वुञ् प्रत्ययस्योदाहरणम् यथा - मिथुनस्य भावः, कर्म वा मैथुनिका, मैथुनिक इति।

तथैव "संज्ञाया कन् "[19] इत्यनेन पिष्टशब्दात् कन्- प्रत्ययो भवति विकारे संज्ञायां विषये इति। "पिष्टक" इति सूत्रस्यास्योदाहरणम्। सूत्रेऽस्मिन् " पूपोऽपूपः पिष्टकः[20] स्यादित्यमरकोशस्य पक्तिः उद्धृता। तदन विस्तृततया प्रदर्श्यते-

---

12 अमरकोशः , प्रथमकाण्डम् , वारिवर्गः , श्लो.सं -13

13 अष्टा- 4/4/67

14 व्या.सि.सु - सू.सं-4/4/67,पृ.सं -156

15 अमरकोशः , द्वितीयकाण्डम् ,वैश्यवर्गः , श्लो.सं - 50

16 अष्टा-5/1/124

17 व्या.सि.सु -सू.सं -5/1/124, पृ.सं -204

18 अमरकोशः , तृतीयकाण्डम् , लिङ्गादिसंग्रहवर्गः , श्लो.सं - 39

**"पूपोऽपूप: पिष्टक: स्यात्करम्भो दधिसक्तव:।**

**भिस्सा स्त्री भक्तमन्धोऽन्नम् ओदनोऽस्त्री स दीदिवि:।। "[21]**

श्लोकेऽस्मिन् को नाम पिष्टक:इति प्रदर्शित:, अपूपस्य (पुआ" इति देवनगर्यां) त्रीणि नामानि सन्ति - पूप:, अपूप: पिष्टकश्च इति। श्लोके अग्रे उच्यतेकरम्भ-दधिसक्तु इतिद्वे दधियूक्तसक्तो:नामनी इति। भक्तस्य षड् नामानि- भिस्सा, भक्तम्. अन्धस्, अन्नम्, औदनम्, दीदिवि:इति।

अग्रिम सूत्रे "प्लक्षादिभ्योऽण्"[22]इति सूत्रेण प्लक्षाऽ दिभ्य: प्रातिपदिकेभ्य: फले विकारावयवत्वेन विवक्षिते अण प्रत्ययो भवति। प्लाक्षम्, नैयग्रोधम् इत्यस्योदाहरणम्। सूत्रेऽस्मिन् " आश्वत्थवैणवप्लाक्षनैयग्रोदैङ्गुदं फले "[23] इत्यमरकोशस्य पक्ति: उद्धृता। तदत्र प्रदर्श्यते-

**द्विहीनं प्रसवे सर्वं हरीतक्याद्य: स्त्रियाम्।**

**आश्वत्थवैणवप्लाक्षनैयग्रोधैङ्गुदम्फले[24]**

अश्वत्थस्य फलं आश्वत्थमित्युच्यते, प्लक्षस्य फलं प्लाक्षमित्युच्यते,नैग्रोधस्य फलं नैयग्रोध इत्युच्यते। एतदनन्तरं " कडङ्करंदक्षिणाच्छ च"[25] इति सूत्रे अमरकोशस्य- पड्क्तिद्वयं उद्धृतम्। सूत्रेणानेन कडङ्करदक्षिणाशब्दाभ्यां छ: प्रत्ययो भवति, चकाराद् यत् च, तदर्हति इत्यस्मिन् विषये इत्यर्थ:। सूत्रस्थ- कडङ्कर-इत्यस्योल्लेख: अमरकोशेऽपि दृश्यते, सूत्रेऽस्मिन् सा पङ्क्तिरुद्धता तद्यथा-कडङ्करं वुसंक्लीबमित्यमर:" [26] इति। अमरकोशस्थ द्वितीयकाण्डस्य वैश्यवर्गेद्वाविंशतितमे श्लोके को नाम कडङ्करं तदुच्यते -

**“नाडी नालं च काण्डोऽस्य पलालो स्त्री स निष्फल:।**

**कडङ्करो बुसं क्लीवे धान्यत्वचि तुष: पुमान्।।" इति।**

स्थूलधान्यत्वच: कडङ्करवुसं इति नामद्वयं भवति। सूत्रेऽस्मिन् अमरकोशस्थ पङ्क्तिद्वयं उद्धतम्।तयो: द्वितीया पक्ति "दक्षिणीयो दक्षिणार्हस्तत्र दाक्षिण्येऽपि[27] इति।दक्षिणीयो, दक्षिणा इति सूत्रस्योदाहरणम्। सूत्रेडस्मिन्"दक्षिणीयो दक्षिणार्हस्तत्र दाक्षिण्येऽपि"[28] इति अगरकोशस्थ पङ्क्तिरुद्धता। एतदग्रे विस्तृतरूपेण पश्याम: -

---

[19] अष्टा-4/3/147
[20] व्या.सि.सु , सू.सं -4/3/147
[21] अमरकोश: , द्वितीयकाण्डम्, वैश्यवर्ग:, श्लो.सं - 48
[22] अष्टा - 4/3/164
[23] व्या. सि.सु - सू.सं - 4/3/164
[24] अमरकोश:, द्वितीयकाण्डम्,वनौषधिवर्ग: , श्लो.-18
[25] अष्टा - 5/1/69
[26] व्या.सि.सु -,सू.सं - 5/1/69
[27] व्या.सि.सु -सू.सं - 5/1/69
[28] व्या.सि.सु -सू.सं - 5/1/69

**" पूज्य प्रतीक्ष: सांशयिक: संशयापन्नमानस:।**

**दक्षिणीयो दक्षिणार्हस्तत्र दक्षिण्य इत्यपि ।। [29]**

अयमाशयास्य-पूज्य:,प्रतीक्ष्यश्च एते द्वे मान्यपुरुषस्य नामनी वर्तेते, संशययुक्त- वस्तो:,"सांशयिक:", "संशयमापन्नमानस:"इति नामद्वयं वर्तते। दक्षिणां दातुं योग्यपुरुषाणां नामत्रयं भवति दक्षिणीय:, दक्षिणार्ह: दक्षिण्यश्च।

श्रृङ्खलायां अस्यां अग्रे"संशयमापन्न:"[30] इति सूत्रं आयाति। सूत्रेणानेन संशयशब्दात् द्वितीयासमर्थादापन्न:इत्येतस्मिन् अर्थेठञ् प्रत्ययो भवतीति सूत्रार्थ:। सूत्रे अमरकोशस्यअनुरीत्या "संशयमापन्नमानस:" इत्यस्यार्थ:प्रदर्शित:। तदत्र प्रदश्यते -

"पूज्य: प्रतीक्ष्य: सांशयिक: संशयापन्नमानस:"सांशयिक:", "संशयमापन्नमानस:"[31] इति संशययुक्त-वस्त्रो: नामद्वयं इति।

अग्रे"अवारपारात्यन्तानुकामं गामी"[32]इति सूत्रे अमरकोशस्य पङ्क्तिरेका दृष्टा, तदत्र प्रदर्श्यते। सूत्रेणानेन अवारपार अत्यन्त अनुकाम इत्येतेभ्यो द्वितीयासमर्थेभ्य: गामी इत्येतस्मिन्नर्थे ख: प्रत्ययो भवतीति। सूत्रे"विपरीताच्च" इति वार्तिकं पठितम्,तेन "पारावार" शब्दादपि ख- प्रत्यये सति पारावारीण: इति रूपं सिध्यति। को नाम"पारावार" एतदर्थंसूत्रेऽस्मिन् "पारावारे परावीचीतीरेत्यमर: "[33]इति पङ्क्तिरूद्धृता।

**"पारावारे परार्वाची तीने पात्रं तदन्तरम्।**

**द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम्।।"[34]**

एतदनन्तरं अग्रिमे सूत्रे "समां समां विजायते"[35] इति सूत्रे"समांसमीना, सा यैव प्रतिवर्षं प्रसूयते "[36] इति अमरकोशस्थ पड्क्तिरुद्धृता। एतस्मिन् विषये अत्र पश्याम:, प्रकृतसूत्रेण द्वितीयासमर्थात्समांसमामिति शब्दाद्विजायतेऽर्थे ख: प्रत्ययो भवतीति। समांसमां विजायत इति समांसमीना गौ: इत्यस्योदाहरणम्।को नाम समांसमीना तदत्र सुधानिधिकारेण अमरकोशानुसारं प्रदर्शितम्।

"द्रोणक्षीरा द्रोणदुग्धा धेनुष्या बन्धके स्थिता।समांसमीना सा यैव प्रतिवर्ष प्रसूयते।।"[37]

द्रोणपरिमितं क्षीरमस्या द्रोणक्षीरा, द्रोणं दोग्धीति द्रोणदुग्धा इति द्वे द्रोणपरिमितक्षीरगवा:। या बन्धके स्थिता सा धेनुष्या स्यात्। या प्रतिवर्षं प्रसूयते सा समांसमीना स्यात् इति।

---

[29] अमरकोश: तृतीयकाण्डम्, विशेष्यनिघ्नवर्ग: ,श्लो.सं - 3

[30] व्या .सि.सु, पृ.सं - 189

[31] अमरकोश: , तृतीयकाण्डम्, विशेष्यनिघ्नवर्ग:, श्लो.सं - 3

[32] अष्टा - 5/2/11

[33] व्या.सि.सु - सू.सं -5/2/11 , पृ.सं - 211

[34] अमरकोश: , प्रथमकाण्डम् , वारिवर्ग: , श्लो .सं - 8

[35] अष्टा- सू.सं - 5/2/12

[36] व्या. सि. सु - सू.सं - 5/2/12 , पृ.सं - 211

[37] अमरकोश: , द्वितीयकाण्डम् , वैश्यवर्ग: , श्लो. सं - 72

पश्चात् " इनच्चिटच्चिक चि च"[38] इति सूत्रे अमरकोशस्य या पङ्क्तिरुद्धृता तदत्र विचार्यते - प्रकृतसूत्रेणानेन नासिकाया नतेऽभिधेये निशब्दाद् इनच् पिटच् इत्येतौ प्रत्ययौभवतः, तत्सन्नियोगेन च यथासङ्ख्यं निशब्दस्य चिक चि इत्येतौ आदेशौ भवतः इति। सूत्रेऽस्मिन्"क्लिन्नस्य चिल्पिल्लश्चास्य चक्षुषी इति वक्तव्यम् " इति वार्तिकं पठितम्, तेनयस्य मनुष्यस्य नेत्रे क्लिन्ने (अश्रुपूर्णौ) स्तः, तस्य निर्देशार्थं "विलन्न" शब्दात् "ल" इति प्रत्ययः विधीयते, तथा च तत्सन्नियोगेन "क्लिन्न" शब्दस्य"चिल्" तथा "पिल्" एतौ आदेशौ भवतः इति। एतदर्थंसूत्रेऽस्मिन्ग्रन्थकारेण"स्युः क्लिन्नाक्षे चिल्लपिल्लचुल्लाः क्लिन्नाक्षिण चाप्यमी"[39]इति पक्तिरुद्धता। तदत विस्तृततया प्रदर्श्यते -

**" वातकी वातरोगी स्यात्सातिसारोऽतिसारकी।**

**स्युः क्विन्नाक्षेचुल्लचिल्लपिल्लाः क्विन्नेऽक्षिण चाप्यमी॥"[40]**

अस्यायमाशयः - वातोऽतिशयितोऽस्येति वातकी, वातरोगोऽस्यास्तीति वातरोगी स्यादिति द्वेवातरोगिणः। सहातिसारेण वर्तते सातिसारः, अतिसारोऽस्यास्तीति अतिसारकी इति द्वे अतिसारवतः। क्लिन्ने अक्षिणी यस्येति क्लिन्नाक्ष-स्तस्मिन्,चुल्लपिल्लपिल्लाःस्युः क्लिन्ने चक्षुषी अस्येति चुल्लः पिल्लःअमी सुना चुल्लाद्याःक्लिन्ने अक्षिण च स्युरिति त्रीणि क्लिन्ननेत्र तद्वतोः इति।

**श्रृङ्खलायां अस्यामग्रे "अधिभ्यां त्यकन्नासन्नारूढयोः"[41]**

इति सूत्रे पठितां अमरकोशस्थ - पड़क्तिं पश्यामः। प्रकृतसूत्रेणानेन उप अधि इत्येताभ्यां शब्दाभ्यां यथासङ्ख्यम् आसन्न आरूढ इत्येनयोरर्थयो वर्त्तमानाभ्यां त्यकन् प्रत्ययो भवति संज्ञायां विषये इति। उपत्यका, अधित्यका च सूत्रस्योदा- हरणम्। को नाम अधित्यका, उपत्यका एतदर्थं सूत्रेऽस्मिन् "उपत्यकादेरासन्ना भूमिरुर्द्धमधिकत्यका "[42] इति अमरकोशस्थ पङ्क्तिरुद्धता। तदत्र प्रदश्यते -

"खनि स्त्रियामाकरः स्यात्पादाः प्रत्त्यन्तपर्वताः। उपत्यकारासन्ना भूमिरूर्ध्वमधित्यका।।"[43]

तथैव "ऊषसुषिमुष्कमधो रः"[44]इति सूत्रे अमरकोशस्थ पक्तिचतुष्टय- मृद्धृतम् सुधानिधिकारेण तदग्रे प्रदर्श्यते- प्रकृतसूत्रेणऊष, सुषि, मुष्क, मधु इत्येतेभ्यः प्रातिपदिकेभ्यो रः प्रत्ययो भवति मत्वर्थे इत्यर्थः। को नाममुष्क इत्यर्थं सुधानिधिकारेण प्रकृतसूत्रे"मुष्कोऽण्डकोशोवृषणः"[45] इत्यमरकोशस्थ पङ्क्ति उद्धता।अस्याशयं पश्यामः-

**"मूष्कोऽण्डकोशो वृषणः पृष्ठवंशाधरे त्रिकम्।**

---

38 अष्टा - 5/2/33

39 व्या.सि.सु - सू.सं - 5/2/33, पृ.सं - 217

40 अमरकोशः , द्वितीयकाण्डम्, मनुष्यवर्गः, श्लो.सं - 60

41 अष्टा- 5।2/34

42 व्या.सि.सु , सू.सं -5/2/34, पृ.सं - 217

43 अमरकोशः , द्वितीयकाण्डम् , शैलवर्गः , श्लो.सं - 7

44 अष्टा- 5/2/107 , 45.

45 व्या.सि.सु ,सू.सं - 5/2/107, पृ.सं - 238

**पिचण्डकुक्षी जठरोदरं तुन्दं स्तनौ कुचौ।।**[46]

अस्यायमाशयः - मुष्क - अण्डकोश - वृषण इति अण्डकोशस्य नामत्रयम्, पृष्ठस्य अधः त्रिकमित्युच्यते, तस्य आङ्ग्लभाषायां (Sacral) इति नाम, पिचण्ड - कुक्षि- जठर- उदर-तुन्द इत्युदरस्य पञ्चनामानि, स्तन-कुचइति द्वेवक्षोजस्य नामनी वर्त्तेते।

प्रकृत सूत्रेणैव "खमुखकुञ्जेभ्यो नगपांसुपाण्डुभ्यश्चोपसख्यानम्" इति वार्तिकं पठितम्। "पाण्डुरः" इति वार्तिकस्यास्यैकोदाहरणं वर्तते। अत्र पुनः को नाम पाण्डुरः इत्यर्थं "हरिणः पाण्डुरः पाण्डुरिः"[47] इति अमरकोशस्थ पक्ति उद्धृता। तस्याशयंपश्यामः -

**"अवदातः सितो गौरो वलक्षो धवलोऽर्जुनः।**

**हरिणः पाण्डुरः पाण्डुरीषत्पाण्डुस्तु धूसरः।"**[48]

अस्यायमाशयः- अवदात - सित - गौर - वलक्ष - धवल -अर्जुन एते श्वेतवर्णस्य नामानि सन्ति। हरिणः, पाण्डुरः, पाण्डु एते पीतयुक्तश्वेतवर्णस्य नामानि सन्ति। ईषत्पाण्डु- धूसरइत्यपि वर्णविशेषस्य नामनी स्तः इति श्लोकस्यास्य भावः।

इतः परं सुधानिधौ "द्युद्रुभ्यां मः"[49] इतिसूत्रेऽपि अमरकोशस्थ पक्तिः दृष्टा। तदग्रे प्रदर्श्यते-

सुत्रेणानेन द्युद्रुशब्दाभ्यांमः प्रत्ययो भवति मत्वर्थे इति। द्युमः, द्रुमश्चास्योदाहरणम्।"द्रुमः" इति किम्एतदर्थं "पलाशी दुद्रुमागमाः"[50] अमरकोशस्य पङ्क्तिं उद्धृतवान्।तां पङ्क्तिं विस्तृतरूपेण अग्रे प्रदर्श्यते-

**" वृक्षो महीरुहः शाखी विटपी पादपस्तरुः।**

**अनोकहः कुटः शाल पलाशी दुद्रुमागमाः।।"**

अस्यायमाशयः- वृक्ष - महीरुह - शाखिन् - विटपिन्- पादप- तरु - अनोकह - कुट - शाल - पलाशिन् - द्रु - द्रुम - आगम इति त्रयोदश-वृक्षस्य नामानि सन्ति। इति।

एवञ्चअग्रिम सूत्रेऽपि एवमेव द्रष्टुं शक्यते। यथा "अम्भोऽर्णस्तीय पानीय"[51] इति अमरकोशस्थ पड़क्तिः"केशाद्वोऽन्यतरस्याम्"[52] इति सूत्रे सुधानिधिकारेण उद्धृता। प्रकृतसूत्रेऽस्मिन्" अर्णसो लोपश्च वाच्यः"इति वार्तिकं पठितम्। वार्तिके "अर्णस्" इति शब्दः पठितः, को नाम अर्णस्,एतदर्थंअमरकोशस्थ पङ्क्तिरुद्धृता, तदत्र विस्तरेण प्रदर्श्यते-

**" कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम् "**

---

46 अमरकोशः, द्वितीयकाण्डम्,मनुष्यवर्गः , श्लो.सं - 77

47 व्या.सि.सु , सू.सं - 5/2/107 , पृ.सं - 238

48 अमरकोशः, प्रथमकाण्डम् , धीवर्गः , श्लो.सं- 14

49 अष्टा - 5/2/108

50 व्या .सि.सु , सू.सं - 5/2/108, पृ.सं- 238

51 व्या.सि.सु , सू.सं- 5/2/109, पृ.सं- 238

52 अष्टा- सृ.सं- 5/2/109

**अम्भोर्णजस्तोयपानीयनीरक्षीराम्बुशम्बरम्।।"**[53]

कवन्ध - उदकम्- पाथम् - पुष्करम् - सर्वतोमुखम् - अम्भस्- अर्जस् - तोय - पानीय - नीर - क्षीर- अम्बु - शम्बरम् इति एतानि जलस्य नामानीति।

श्रृङ्खलायां अस्यां "वातातीसाराभ्यां कुक् च " इति सूत्रेऽपि "वातकी वातरोगी स्यात् सातिसारोऽतिसारकि"[54] इति अमरकोशस्थ -पड़क्ति: प्रदर्शिता। प्रकृतसूत्रेण वात अतीसार इत्येताभ्यां शब्दाभ्यां मत्वर्थ इनि: प्रत्ययो भवति तत्सन्नियोगेन च तयो: कुग् आगमो भवतीत्यर्थ:। वातकी, अतीसारकी इत्यस्योदाहरणम्। अत्र को नाम "वातकी", "अतिसारकी"एतदर्थं उपरोक्त पक्ति: उद्धता सुधानिधिकारेण, तदत्र विस्तृततया प्रदर्श्यते-

**" दद्रुणो दद्रुरोगी स्यात् अर्शरोगयुतोऽर्शस:।**

**वातकी वातरोगी स्यात् सातिसारोऽतिसारकी।।"**[55]

"दद्रुण - दद्रुरोगिन्" इति द्वे दद्रुयुक्तस्य नामनी, अर्श- रोगयुत - अर्शस:"इति अर्शयुक्तस्य नामद्वयम्।वातकिन:- वाततरोगिन्" इति वातरोगयुक्तस्य नामद्वयम् वर्तते। "सातिसार- अतिसारकिन्" इति द्वे अतीसार युक्तस्य नामनी इति।

इत: परं सुधानिधौ"अहंशुभमोर्युस्" इति सूत्रे ऽपि अमरकोशस्थ पङ्क्ति: दृष्टा। सुत्रेणानेन अहं शुभम् इत्येताभ्यां शब्दाभ्यां मत्त्वर्थे युस् प्रत्ययो भवतीत्यर्थ:। अहंयु:, शुंभयु: इत्यस्योदाहरणम्। को नाम शुभंयुस्तदर्थं "शुभंयुस्तुशुभान्वित"[56]इति पङ्क्ति: उद्धृता। अस्याशयंएवं वर्तते।

**"अहङ्कारवानहंयु: शूभंयुस्तु शुभान्वित:।**

**दिव्योपपादुका देवा नृगवाऽद्याजरायुजा:।। "**[57]

आशय:- " अहंकारवत् - अहंयु" इति द्वे अहंकारिण: नामानी वर्तेते,"शुभंयु - शुभान्वित"इति। शुभान्वितस्य नामद्वयं वर्त्तते। शुभान्वितो नाम कल्याणकारी इति।

एवम्प्रकारेण व्याकरणसिद्धान्त-सुधानिधौ विविध-सूत्रेषु ग्रन्थकारेण अमरकोशस्थ पङ्क्तय: उद्धृता:। अत्र मया तद्धितसूत्रेषु उद्धता: पङ्क्तय एव यथामति प्रदर्शिता।

**परिशीलितग्रन्थसूची**

1.अष्टाध्यायी पं . ईश्वरचन्द्र:, चौखम्बा पब्लिशर्स्

2.शब्दकौस्कतुभ:, चौखम्बा - संस्कृत - सीरीज,वाराणसी

3.व्याकरणसिद्धान्तसुधानिधि:, चौखम्बा संस्कृतसीरीजग्रन्थमाला, वाराणसी

---

[53] अमरकोश:, प्रथमकाण्डम्, वारिवर्ग:, श्लो.सं- 4

[54] व्या.सि.सु , सू.सं- 5/2/129, पृ.सं- 243

[55] आमरकोश: , द्वितीयकाण्डम्, मनुष्यवर्ग: , श्लो.सं- 60

[56] व्या.सि.सु , सू.सं- 5/2/140 ,पृ.सं- 244

[57] अमरकोश:, तृतीयकाण्डम्, विशेष्यनिघ्नवर्ग:, श्लो.सं- 48

4. व्याकरणसिद्धान्तसुधानिधि:, सत्यप्रकाशदुबे, राजस्थानपत्रिका

5. व्याकरणसिद्धान्तसूधिनिधि:, राजस्थानसंस्कृत अकादमी, जयपुर

6. अमरकोश:, पं विश्वनाथ झा, मोतिलालबनारसीदास, दिल्ली

7.अमरकोश:, डा. जयप्रकाश मिश्र, हंसा प्रकाशन, जयपुर

8.अमरकोश:, डा . सूधाकर मालवीय:, चौखम्बा अमरभारती प्रकाशन।